International Journal of Sanskrit Research 2021; 7(1): 321-323

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 321-323
© 2021 IJSR
www.anantaajournal.com
Received: 11-11-2020
Accepted: 21-12-2020

**पियाली मालाकार**
शोधछात्रा, (शिक्षाशास्त्रविभागः)
श्रीसदाशिवपरिसरः, पुरी, ओडिशा, भारत

**Corresponding Author:**
**पियाली मालाकार**
शोधछात्रा, (शिक्षाशास्त्रविभागः)
श्रीसदाशिवपरिसरः, पुरी, ओडिशा, भारत

# भारतीयसंविधाने मानवाधिकारः

**पियाली मालाकार**

**शोधसारः-**
मानवसमाजः अति प्राचीनः । मानवः यदा समाजे निवसति तदा सदस्येषु पारस्परिकः सहयोगः एव तस्य समृद्धजीवनं निर्मातुं सहायतां प्रयच्छति । दृश्यते खलु संसारे सामाजिकसदस्येषु वैमनस्यं कलहञ्च । अस्य कारणं वर्तते स्वार्थसाधने वाधा, समृद्धजीवननिर्माणाय अन्तरायश्च । अतः सर्वे सामाजिकः सदस्याः स्वकीयम् उन्नतिं साधयन्तु, तेषां जीवनं संघर्षं शून्यं भवतु इति धिया समाजे सदस्यानां कृते केचन अधिकाराः कर्तव्यानि च निर्धारितानि । एकस्य अधिकारः अपरस्य कर्तव्यं वर्तते । इतिहासः एव प्रमाणं, यत् अधिकारः कर्त्तव्ययोः मध्ये बहुधा संघर्षं प्रचलति ।
यदि शिक्षासंस्थायाः सदस्याः तेषां कर्तव्यम् अधिकारञ्च प्रति सचेतनाः स्युः, तर्हि शिक्षा प्रक्रियायाः सुसञ्चालनं मानव संसाधननां सुसंयतः विकासः आयाससाध्यः न भवेत् । अतः शिक्षाक्षेत्रे मानवाधिकारं प्रति सचेतनता नित्यान्त काम्या ।
1945 तम वर्षे संयुक्तराष्ट्रसंघस्य स्थापना अभवत् । ततः मानवाधिकारायोगस्य घटनमभवत् । आयोगः 1946 तम वर्षे मानवाधिकारस्य एका विश्वव्यापिघोषणां प्रस्तुतवान् । संयुक्तराष्ट्रसंघस्य महासभया 10 दिसम्बर "मानवाधिकारदिवस" रूपेण अङ्गीक्रियते । मानवाधिकाराणां संरक्षणाय संवर्द्धनाय च कार्यरतं भवति इयं संस्था ।
संविधानस्य प्रारम्भे नागरिकाणां कृते षटमौलिकाधिकारः विषये वर्णितमस्ति । यथा – समानताधिकारः, शिक्षायाः अधिकारः, स्वतन्त्रताधिकारः, धार्मिकस्वतन्त्रताधिकारः, नारीणामधिकारः, शिशुनामधिकारः संविधानकाधिकारश्च ।

**मुख्यांशः** भारतीयसंविधाने, प्राचीनः, संयुक्तराष्ट्रसंघस्य

**प्रस्तावना -**
'नरत्वं दुर्लभं लोके' इत्युक्तिमाश्रित्य, मानवः परमात्मनः सर्वश्रेष्ठकृतिः भवति । प्रकृतिः चराचरस्य संसृष्टिं करोति । सा च प्रकृतिः अनेकेशः मानवाय सुविधोपलब्धिमपि कारयति । आसां सुविधानां साहाय्येन सः जातकः शनैः शनैः विवर्धमाना स्वकीयां स्थितिं दृढीकरोति । तस्मै शीतत्राणाय ग्रीस्मत्राणाय बुभुक्षानिवृतये जलसम्बन्धिक्लेशनाशाय च प्रकृत्या सूर्यादिभिः प्रचुरामात्रया साहाय्यं मिलति । एवं प्रकारेण मानवः स्वदृढां स्थितिमाप्नोति । पुनः स्वस्य नश्वरे संसारोऽस्मिन् मानवः तस्य अधिकारस्य कृते कर्त्तव्यस्य कृते च प्रयत्नशीलो भूत्वा प्रतिदिनं तस्मिन् कर्मणि नियोजितो भवति । यथा एकस्याधिकारः अपरस्य कर्त्तव्य भवति । मानवाधिकारः सशस्त्रबलेन नौसेना- वायुसेनानां निर्माणं करोति तथा च अन्तर्गतसंघस्य स्थापनं करोति । मनुष्याणां स्वतन्त्रता, तथा च व्यक्तेः गौरवसम्बद्धाः अधिकाराः एव मानवाधिकाराः भवन्ति याः संविधानस्य प्राणभूताः वर्तन्ते । तथा च मानवाधिकारः अन्तराष्ट्रियविषयः एवञ्च भारतस्य न्यायालयद्वारा प्रवर्तनीयः । सामान्यतया पश्यामः चेत् मानवाधिकारः शब्दद्वयस्य सम्मिश्रणेन एव भवति । एकः भवति मानवः, अपरः अधिकारः । अतः मानवस्य अधिकारः भवति मानवाधिकारः ।
प्रथमं जानीमः यत् मानवशब्द संस्कृतस्य 'मन्' (ज्ञाने) तथा 'मन्' धातुभ्यां 'उ' प्रत्यययोगेन मनुशब्दः भूत्वा तस्मात् अपत्ये अर्थे मनुष्यः तथा मानवशब्दः सिद्धः भवति । अर्थात् भारतीयवाङ्मयानुसारं महर्षिमनोः सन्ततिः मानव इत्युच्यते । तेनैव प्रकारेण अधिकारः शब्दः 'अधि' उपसर्गपूर्वक 'कृ' धातोः घङ् प्रत्ययात् उत्पन्नः भवति ।
उपयुक्तप्रकारेण मानवाधिकारस्य अर्थः बोद्धुं शक्नुमः । मानवाधिकारपरम्परायां विचाराभिव्यक्तेः, उपासनापद्धतेः, जीविकापद्धतिचयनस्य, मतप्रदानस्य, नेतृत्वचयनस्य, स्वतन्त्रतापरकविचाराः समुल्लसन्ति । अधिकारं विना मानवजीवनं निरर्थकमनुमीयते । अधिकारविहीनो नरः पशुवद् आचरति । सोऽधिकारं विना स्वजीवननिर्माणकर्मणि स्वात्मानं सहायं मत्वा इतस्ततः धावति ।
सकलमानवाधिकाराः मनुष्ये अन्तर्निहितायाः प्रतिष्ठायाः गौरवात् तथा विभिन्नगुणेभ्यः व्युत्पन्नाः भवन्ति । अपि मानवाधिकारस्य मूलभूताधारं भवति मनुष्यः । प्रारम्भे राजनीतिकविचारकै तथा दार्शनिकैः प्रस्तुतनैसर्गिकाधिकाराणां तथा मानवाधिकाराणां संकल्पनायाः भ्रान्तिः आसीत् । कालक्रमे नैसर्गिकाधिकारा अपि मानवाधिकारस्य संकल्पनायां सन्नद्धाः अभवन् । इतिहासेषु तथा प्राचीनधर्मग्रन्थेषु मूलमानवाधिकाराणां वर्णनमभवत् । इदानीं राष्ट्रियान्तराष्ट्रियपरिप्रेक्ष्यां मानवाधिकाराणां मानदण्डं तथा तस्य प्रासङ्गिकतां विषये सर्वत्र आलोचना भवति ।

सर्वत्र अयं प्रश्नः उदेति यत् को नाम मानवाधिकारः ? अस्य मूलावधारणा राष्ट्रियमानवाधिकारायोगस्याध्यक्षेण न्यायमूर्तिना जे. एस. बर्मा महोदयेन एकस्यां पंक्तौ स्पष्टीकृतमस्ति यत् –

''व्यक्तित्वस्य सर्वाङ्गीणविकासाय आधारप्राप्तप्रकृतप्रदत्तगौरवपूर्णजीवनयापनाय मौलिकाधिकारस्य सकलोपादानां मानवाधिकारस्य मानदण्डो भवति इति।''

"नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं लोके शक्तिस्तत्र सुदुर्लभा ॥"

-इति श्लोकमाश्रित्य मानवः प्राणिषु श्रेष्ठत्वं प्राप्नोति । सः एकः सांस्कृतिकः सामाजिकः च प्राणी भवति । भिन्नतावशात् इतरप्राणिषु सामाजिकतायाः गुणम् एकपुरुषतः द्वितीयपुरुषं यावत् वंशानुक्रमस्य तत्त्ववाहकाणुभिः हस्तान्तरितः भवति। परन्तु मानवः सर्वप्रथमतः 1776 तमवर्षे संयुक्तराज्य अमेरिकायाः स्वतन्त्रता संबन्धी घोषणापत्रे मानवाधिकारशब्दस्य प्रयोगः अभवत्। फ्रान्सीसी, क्रान्ति 1789 तमवर्षे मनुष्याणां तथा नागरिकाणाम् अधिकारसम्बन्धित घोषणापत्रं सम्मुखमागतम्। 1229 तमवर्षे अन्तराष्ट्रियविधिसंस्थानं न्यूयार्क, संयुक्तराज्य अमेरिका मानवाधिकारस्य तथा कर्त्तव्यस्य एकं घोषणापत्रं प्रस्तुतवान्। अन्तराष्ट्रियस्तरे संयुक्तराष्ट्रसंघेन देश-धर्म-लिङ्ग-जाति इत्यादिभिः विना संपूर्णविश्वस्य प्रत्येकस्मै मानवाधिकारघोषणा माध्यमेन एक महत्वपूर्णप्रयासं कृतम्। 1945 तम वर्षे संयुक्तराष्ट्रसंघस्य स्थापना अभवत् । ततः मानवाधिकारायोगस्य घटनमभवत् । आयोगः 1946 तम वर्षे मानवाधिकारस्य एका विश्वव्यापिघोषणां प्रस्तुतवान्। संयुक्तराष्ट्रसंघस्य महासभया 10 दिसम्बर "मानवाधिकारदिवस" रूपेण अङ्गीक्रियते । मानवाधिकाराणां संरक्षणाय संवर्द्धनाय च कार्यरतं भवति इयं संस्था। महासभाद्वारा मानवाधिकाराणां विश्वव्यापीघोषणायाम् उक्तमस्ति यत् मानवाधिकारः तथा मानवीयगरिमायाः सम्मानं विश्वे स्वतन्त्रता न्यायस्य शान्तेश्च आधारः भवति । एषा घोषणा सम्प्रति मानवाधिकारस्य घोषणापत्रमाध्यमेन स्वीक्रियते।

संयुक्तराष्ट्रसंघेन 10 दिसम्बर 1948 तमवर्षे मानवाधिकारविश्वघोषणायां प्रत्येकव्यक्तये न्युनातिन्यूनं त्रिंशदधिकारप्रदानाय घोषणं कृतम् । वस्तुतः मानवाधिकारघोषणायाः इतिहासः अतीव पुरातनं भवति।

मानवाधिकाराणां प्रयोगायाभिवर्द्धनाय च 28 दिसम्बर, 1992 तम वर्षे संयुक्त राष्ट्रसंघमहासभा द्वारा स्वैच्छिकमानवाधिकार न्यायकोषस्य स्थापना अभवत् । यस्मिन् भृत्यक्रीतदासवत् पीडितजनानां सहायताप्रदानं मूललक्ष्यं भवति । मानवाधिकाराणां संरक्षणदिशि अनेकप्रयासाः विश्वस्तरेषु क्रियन्ते अग्रे अपि भविष्यन्ति । सन्दर्भेऽस्मिन् संयुक्तराष्ट्रसंघस्य महासचिवेन दिनांक 10 दिसम्बर 1990 तमवर्षे मानवाधिकारदिवसस्यावसरे एतत् कथितम् यत् – मानवाधिकाराणां प्रशासनस्य सार्वभौमिकरूपेण इदानीम् अस्माभिः बहु कर्त्तव्यं वर्तते।

वस्तुतः मानवाधिकारस्य मूललक्ष्यं भवति यत् अस्यां परिप्रेक्षौ अन्तराष्ट्रियस्तरे संयुक्तराष्ट्रसंघेन देश-धर्म-लिंग-जाति च विना सम्पूर्णविश्वस्य प्रत्येकस्मै मानवाय मूलभूताधिकारप्रदानाय मानवाधिकारघोषणा माध्यमेन एक महत्वपूर्ण प्रयासः भवेत् । संयुक्तराष्ट्रसंघेन 10 दिसम्बर 1948 मानवाधिकारघोषणायां प्रत्येकव्याक्तिं न्यूनातिन्यूनं त्रिंशत् अधिकारप्रदानार्थं घोषणा कृता। वास्तवतः अस्माकं भोजनम्-शिक्षा-स्वास्थ्य इत्येषां सुरक्षा जीवनस्य मूलाधिकारः भवति। अस्माकमेतदधिकारं सर्वदा अस्मभ्यं लभ्यताम् तथा कदापि अस्याधिकारस्य क्षुन्नं न भवतु, इत्यस्य दायित्वं भवति सर्वकारस्य । सर्वकारोऽपि अस्योत्तरदायित्वं सम्यक निर्वहणार्थम् अक्टुवर 1993 तमे वर्षे देशे राष्ट्रियमानवाधिकारायोगस्य गठनमकरोत् । मानवाधिकारप्रदानं तथा तेषामधिकाराणां सुरक्षाकरणम् । अपि च अधिकारामुल्लंघनकारिणां कृते समुचितदण्डप्रदानम् अस्य मूललक्ष्यं भवति।

यद्यपि भारतवर्षे 15 अगष्ट, 1947 तमे वर्षे स्वतन्त्रमभवत् । सः तस्मिनकाले पूर्णस्वतन्त्रमासीत् । यतः प्रत्येकपूर्णस्वतन्त्रदेशस्य शासनकार्यं संविधानेन एव संपादितः भवति । 23 जनवरी 1950 तम वर्षे भारतवर्षमेकं पूर्णस्वतन्त्रं तथा प्रभूत्वसम्पन्नं देशमभवत्। दिनेऽस्मिन् भारतस्य स्वस्य संविधानस्य प्रारम्भः अभवत् । भारतस्य संविधानस्य निर्माणकाले मानवमूल्यानां पर्याप्तः प्रसारः अभवत्। एतदर्थं मानवाधिकारस्य संरक्षणं प्रदानेन साकं च भारतीय संविधानस्य निर्माणमभवत् । षट्सिद्धान्तानामुपरि भारतस्य संविधानः आधारितः भवति । यथो – स्वतन्त्रता, समानता, मातृत्वं, समाजवादः, धर्मनिरपेक्षता, न्यायश्च । यदि वयं इयं सिद्धान्तं ध्यानेन पश्यामः तर्हि अवश्यं ज्ञातुं शक्नुमः यत् भारतस्य संविधाने मानवाधिकारविषये प्राधान्यं दीयते।

संविधानस्य प्रारम्भे नागरिकाणां कृते सप्तमौलिकाधिकारः विषये वर्णितमस्ति। परन्तु 1979 तमे वर्षे 44 संशोधने एकं आनीय आइन सूचीना साकं योगं कृतवान्। अधुना भारतीयसंविधाने षटमौलिकाधिकाराः सन्ति । ते अधिकाराः यथा – समानताधिकारः, स्वतन्त्रतायाः अधिकारः, शोषणाविरुद्धाधिकारः, धार्मिकस्वतन्त्रताधिकारः, शिक्षासंस्कृतिकाधिकारः, संवैधानिकाधिकारश्च।

**समानतायाः अधिकारः** –

षट्सु मौलिक-अधिकारेषु समानतायाः अधिकारः प्रमुखः । अयं समानिधाकारः भारतीयसंविधानानुसारं सर्वेषां भारतीयानां कृते प्रदत्तः वर्तते। भारतीयसंविधानस्य 14, 15, 16, 17, 18 धारासु समानतायाः विषये उल्लेखः कृतः वर्तते। एतासु धारासु अधोलिखिताः विचाराः प्रस्तुताः –

- देशस्य नियमानुसारं सर्वेऽपि जनाः समानरूपेण सांवैधानिकाधिकारान् प्राप्नुयुः ।
- साधारणस्थानेषु यथा साधारणवाटिकासु संग्रहालयेषु कूपेषु स्नानवेदिकासु मन्दिरेषु च सर्वेषाम् अवैधप्रवेशः भवेत्।
- नियुक्तिक्षेत्रे देशः न कदापि पक्षपातम् आचरेत् । सर्वेऽपि नागरिकाः सर्वकारीयनियुक्त्यर्थमावेदयितुं शक्नुयुः।
- अस्पृश्यतायाः निराकरणं भवेत्। यदि कश्चन अस्पृश्यतायां कुप्रथायां जडितो भवेत् अस्पृश्यतामाचरेद् सः नियमानुसारं दण्डनीयः स्यात्।
- भारतीयः कश्चन नागरिकः वैदिशिकोपनाम्ना धारकः न स्सात्। न भारतरत्नम्, पद्मभूषणः इत्यादिषु पुरस्कारेषु।

**स्वतन्त्रतायाः अधिकारः**

भारतीयसंविधानपक्षतः एतद्देशस्य नागरिकाणां कृते कानिचन मौलिककर्त्तव्यानि निर्धारितानि, केचन मौलिकाधिकारश्च प्रदत्ताः । सर्वादौ आत्मरक्षया सह एतेषामधिकाराणां कर्त्तव्यानाञ्च सुरक्षा भवेत् यतोहि मानवाधिकाराणां सुविनियोगः सम्भवेत् । अतः भारतीयसंविधाने उल्लिखितेषु सुरक्षाऽधिकारेषु केचन प्रमुखाः अधिकाराः अधोनिर्दिष्टाः वर्तन्ते –

- अनुच्छेदः 16 मध्ये वर्णितास्ति - बालकानां कृते वैयक्तिकतायाः, परिवारस्य गृहस्य पत्राचारस्य च सुरक्षायाः अधिकारः।
- अनुच्छेदः 19 मध्ये वर्णितास्ति - व्यक्ति स्वतन्त्रतायाः अभिव्यक्तेः शान्तिपूर्वकसम्मेलनस्य अबाधविचरणस्य च सुरक्षाधिकारः।
- अनुच्छेदः 20 मध्ये वर्णितास्ति - बालानां सांस्कृतिकसुरक्षाधिकारः, भिन्नक्षमाणां कृते विभिन्नसंस्थासु नियुक्तिक्षेत्रे सुरक्षाधिकारः।
- अनुच्छेदः 21 मध्ये वर्णितास्ति - भारतस्य राज्येषु कस्मिन्नपि भागे निवसतां नागरिकाणां कृते तेषां भाषायाः लिपेः संस्कृतेर्वा परिपालनार्थं सुरक्षार्थञ्च अधिकारः।
- अनुच्छेदः 41 मध्ये वर्णितास्ति -

क. अन्तराष्ट्रियशान्तेः सुरक्षायाश्च अभिवृद्धये अधिकारः।
ख. राष्ट्राणां मध्ये न्यायस्य, सम्मानस्य, सम्बन्धस्य च सुरक्षायै अधिकाराः।
ग. अन्तराष्ट्रियविवादानां मध्यस्थद्वारा समाधानस्य अधिकारः।

- अनुच्छेदः 138 मध्ये वर्णितास्ति - सत्यस्य न्यायस्य अधिकारस्य च सुरक्षायै न्यायालयानां कृते अधिकाराः न्यायशक्तयश्च प्रदत्ताः।

**शोषणविरुद्धाधिकारः**

भारतीयसंविधाने 23, 24 अनुच्छेदे शोषणविरुद्धाधिकारविषये वर्णितमस्ति। 14 वर्ष आयु बालकं कस्यापि कार्ये कोऽपि नियोजयितुं शक्नोति । अनुच्छेदः 24 मध्ये वर्णितास्ति - चतुर्दशेभ्यः वर्षेभ्यः अल्पवयः कोऽपि बालकः कस्मिन्नपि कर्मणि, शिल्पागारे खनौ न नियोजनीयः। न वा अन्यस्मिन् परिसङ्कटमये नियोजने व्यापृतः भवेत्। न वा अन्यस्मिन् परिसङ्कटमये नियोजने व्यापृतः भवेत्। यदि कोऽपि अस्य

नियमस्य उल्लंघनं करोति तर्हि सः दण्डं प्राप्स्यति। एतदपि अस्मिन्नक्षेत्रे वर्णितमस्ति – कोऽपि व्यक्तिं क्रय-विक्रयः न करणीयम् अथवा विनापारिश्रमिकेन कर्मे नियुक्तः न करणीयम्।

**धार्मिकस्वतन्त्रतायाः अधिकारः**

भारतम् एकं धर्मनिरपेक्षराष्ट्रम्। अत्र सर्वधर्मस्य प्रचार तथा प्रसाराय स्वतन्त्रता अस्ति। सर्वधर्मस्य जनाः अत्र निवसन्ति। यः कः अपि जनः स्वेच्छानुसारं धर्मं नेतुं ग्रहीतुं शक्नोति। प्रत्येकधर्मस्य कार्यक्रमस्य कृते स्वतन्त्रता अस्ति। शैक्षिकसंस्थाने धार्मिकशिक्षा निमित्तं स्वतन्त्रता अस्ति। कोऽपि विशिष्टधर्मस्य अभिबृद्धेः स्वतन्त्रता अस्ति। भारतीयसंविधाने 25-28 यावत् अनुच्छेदे अस्मिन् विषये वर्णितमस्ति।

**शिक्षा-सांस्कृतिकाधिकारः**

मानवाधिकारस्य शिक्षासंस्कृतेः आलोचनाप्रसङ्गे आइनस्टाइनस्य उद्धृति वक्तुं शक्नुते "Only morality in our actions can give beauty and dignity to life. To make this a living force and bring it to clear consciousness is perhaps the foremost task of education." शिक्षायाः लक्ष्यः भवति न केवलेमेव प्रशिक्षितमनुष्यनिर्माणंम् अपि च परिपूर्णमनुष्यनिर्माणम्। संविधानस्य 29-30 तम अनुच्छेदे शिक्षा-सांस्कृतिकाधिकारस्य विषये आलोचनां क्रियते। अत्र अधोलिखितं विषयं वर्णितमस्ति -

- सर्वे नागरिकाः स्वभाषाः, स्वलिपेः संस्कृतेः विकाशः संरक्षणञ्च कर्तुं शक्नोति।
- सर्वकारेण वा सर्वकारसाहाय्यप्राप्त कोऽपि शिक्षाप्रतिष्ठाने शिक्षालाभाय कोऽपि व्यक्तिं जाति वा भाषाभेदेन वञ्चित कर्तुं न शक्नोति।
- धर्म अथवा भाषाभेदेन संख्यालघुसम्प्रदायाः तेषां स्वाभिमतानुसारेण शिक्षाप्रतिष्ठानं स्थापनं परिचालनं च कर्तुं शक्नुवन्ति।

**सांविधानिकोपाचाराधिकारः**

भारतीयसंविधाने 32-34 अनुच्छेदे सांविधानिक उपचाराधिकारविषये वर्णितमस्ति। अस्मिन् अनुच्छेदे प्रदत्ताधिकारस्य प्रवर्तनाय अवसरः अस्ति। जरूरीकालीन परिस्थोतौ राष्ट्रपति नियमस्य परिवर्तियुतुं शक्नुवन्ति। सर्वं मिलित्वा वयं वक्तुं शक्नुमः यत् मानवाधिकारः मानवस्य सः उपाचारः वर्तते यः शोषणस्य विरुद्धाय आन्दोलनं वोद्रोहं वा करोति। संसारे सर्वेमानवाः शान्तिपूर्वकजीवनं जीवितुं अधिकारः साधनः भवति। संविधानस्य 32(1) तम अनुच्छेदेषु तृतीयोध्याये वर्णितमस्ति मौलिकाधिकाराणां वलवत्करणाय उच्चन्यायालयं प्रति आवेदनं कर्तुं शक्नुते एतद् संविधानस्वीकृतमौलिकाधिकारः।

**निष्कर्षः** –

निष्कर्षरुपेण एतद् वक्तुं शक्यते यत् 1950 तमवर्षे स्थापितसंविधानस्य मूलेषु आधारितोऽस्ति। यद्यपि यत्र तत्र अस्मिन् समाजवादी समष्टिवादी तत्वानां समावेशेऽपि भवति, परन्तु साधारणतः एतत् समष्टिवादी समाजवादीतत्वं मानववादस्य विलोमस्य न भवति, अपितु तस्य पूरकस्य परिचायकः भवति। एवं प्रकारेण संविधानस्य मानवाधिकारेन सचेतनभूत्वा मानवः वास्तविकजीवने अधिकांशक्षेत्रे उपकृता स्युः। ते निर्दिष्टाधिकारविषये सचेतनाः भवन्ति।

एवं प्रकारेण संविधानस्य प्रस्तावनायां वर्णितं भारतस्य पूर्णसत्ताधारी प्रजातन्त्रात्मक-गणतन्त्रस्यावधारणा सामाजिकन्यायस्वतन्त्रतासमानता बन्धुत्वादिनां भावनानामुपरि आधारितो भवति। स्पष्टं भवति यत् एतानि सर्वाणि मूल्यानि उदारवादस्य आधारस्तम्भरूपेण प्रतीयन्ते तथा मानवस्य आन्तरिकमूल्यस्य निदर्शनरूपेण परिगण्यते।

**सन्दर्भग्रन्थसूची** –


1. मानवाधिकार और शिक्षा – पं, जोशी, मोतिलाल, माया प्रकाशन, जयपुर, 2005
2. शिक्षायां मानवाधिकारः – स्नेहलता मिश्र, अनन्या प्रकाशनम्, पुरी, 2009
3. मानवाधिकार के मूलआधार – खरे, प्रेमशंकर, रूपाप्रत्युष, इलाहावाद, 2002
4. मानवाधिकार और उनकी रक्षा – गुप्त, कैलाशनाथ, अविरामप्रकाशन, दिल्ली, 2004
5. Teaching of Human Rights. Mohanty, Jagannath, Deep & Deep publication.